# Shri Sharika Stotram

# શ્રીશારિકાસ્તોત્રમ્

## Document Information

Text title : shArikAstotram

File name : shArikAstotram.itx

Category : devii, shArikA, devI

Location : doc_devii

Transliterated by : Nat Natarajan

Proofread by : Nat Natarajan, NA

Latest update : June 17, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

February 2, 2024

*sanskritdocuments.org*

# શ્રીશારિકાસ્તોત્રમ્

શ્રીશારિકે શરણ્યે ત્વં મયિ દાસે કૃપાં કુરુ ।
ઋણં રોગં ભયં શોકં રિપુન્નાશય સત્વરમ્ ॥

પ્રધ્યુમ્નશિખરાસીનાં માતૃચક્રોપશોભિતામ્ ।
પીઠેશ્વરીં શિલારૂપાં શારિકાં પ્રણમામ્યહમ્ ॥

ઉમા ચૈવતુ કામા ચ ચાર્વઙ્ગી ટઙ્કધારિણી ।
તારા ચ પાર્વતી પાયાદ્યક્ષિણી શારિકાષ્ટમી ॥

શાન્તિં નયસ્યાશુ જનસ્ય પાપં રિક્તત્વમર્થેન નિરાકરોષિ ।
કાયં નિષિઞ્ચસ્યપિ ભાગ્યપૂરૈઃ પ્રગીયસેઽતઃ ખલુ શારિકાત્વમ્ ।
અમે સુરેશિ યોગીન્દ્રામૃતપાયનતત્પરે ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૧॥

કામે કામિતકામાનાં પૂરણે પૂર્ણતાપ્રદે ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૨॥

ચાર્વઙ્ગિ કોટિકન્દર્પલાવણ્યે વિશ્વમોહિનિ ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૩॥

ટઙ્કવારિણિ શત્રૂણાં તિલશો દેહખણ્ડિનિ ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૪॥

તારે નિસર્ગગમ્ભીરભવસાગરતારિણિ ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૫॥

પાર્વતિ ત્રિજગન્માતર્હિમવદ્વંશપાવને ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૬॥

યક્ષિણીષ્ટાષ્ટસિદ્ધીનાં દાયિનિ દેવપૂજિતે ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૭॥

સત્ત્વાદિશબલેઽનન્તબ્રહ્માણ્ડજનનીશ્વરિ ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૮॥

કલાનિધિકલાકાન્તકિરીટકુણ્ડલોજ્જ્વલે ।
શ્રીશારિકે નમસ્તેઽસ્તુ પાહિ માં શરણાગતમ્ ॥ ૯॥

શ્રીશારિકા જગન્માતાઽનાથનાથા સુરેશ્વરી ।
પ્રિયતાં પાદયોરેતત્સ્તોત્રપુષ્પસમર્પણાત્ ॥ ૧૦॥

ઇતિ શારિકાસ્તોત્રં સમાપ્તમ્ ।

Encoded and proofread by Nat Natarajan

---

*Shri Sharika Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*